सितो रक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः ।
ब्रह्मादिजातिभेदेन चर्म्मणां वर्णनिर्णयः ॥
चित्रवर्णस्तु सर्व्वेषां सर्व्वदैवोपपद्यते ॥”*॥
ब्रह्मचारिधार्य्यकृष्णसारचर्म्म । इत्यमरः । २ । ७ । ४७ ॥ (यथा, मनुः । २ । ४१ ।
“कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ॥”)

चर्म्मकषा, स्त्री, (चर्म्मणः कषा । चर्म्म कषतीति । कष + अच् इत्येके ।) पश्चिमदेशजातं गन्धद्रव्यम् । केचित्तु चामारकषा इति ख्याता इत्याहुः । इति भरतः ॥ तत्पर्य्यायः । सप्तला २ विमला ३ सातला ४ भूरिफेना ५ । इत्यमरः । २ । ४ । १४३ ॥ शातला ६ चर्म्मकसा ७ । इति भरतः ॥ मांसरोहिणी । इति राजनिर्घण्टः ॥
(“चर्म्मकषायाः कल्कं बिल्वसमं मर्द्दि काकपदमस्य ।
कृत्वा कुर्य्यात् कटभीं कटुकीटफलाप्रधमनञ्च ॥”
इति चरके चिकित्सास्थाने पञ्चविंशेऽध्याये ॥)

चर्म्मकसा, स्त्री, (चर्म्मणः कसा ।) चर्म्मकषा । इत्यमरटीकायां भरतः ॥

चर्म्मकारः, पुं, (चर्म्म चर्म्मनिर्म्मितद्रव्यादिकं करोतीति । कृ + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) वर्णसङ्करजातिविशेषः । चामार इति मुचि इति च भाषा ॥ स तु चण्डाल्यां वैदेहात् जातः । इति पराशरपद्धतिः ॥ तत्पर्य्यायः । पादूकृत् २ । इत्यमरः । २ । १० । ७ ॥ पादुकृत् ३ चर्म्मारः ४ । इति तट्टीका ॥ चर्म्मकृत् ५ पादुकाकारः ६ । इति हलायुधः ॥ चर्म्मरुः ७ कुरटः ८ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । १० । ३६ ।
“कारावरो निषादात्तु चर्म्मकारः प्रसूयते ॥”)

चर्म्मकारी, स्त्री, (चर्म्म करोति वर्द्धयति उत्कर्षं करोतीति यावत् । कृ + अण् । चर्म्म किरतीति चर्म्म + कॄ + अणित्येके । ततो ङीष् ।) चर्म्मकषौषधिः । इति मेदिनी । रे, २६१ ॥

चर्म्मकीलः, पुं, (चर्म्म कीलतीति । कील + अच् । चर्म्मणि गुह्यस्थचर्म्मणि कील इवेति वा ।) गुह्यरोगविशेषः । ढालीश इति ढारिस् इति च भाषा ॥ तस्य निदानं यथा,—
“व्यानो प्रगृह्य श्लेष्माणं करोत्यर्शस्त्वचो बहिः ।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः ॥
वातेन तोदपारुष्यं पित्तादसितरक्तता ।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥”
इति माधवकरेण रोगविनिश्चयग्रन्थे अर्शोरोगाधिकारे धृतम् । अतोऽस्य चिकित्सा अर्शोरोगचिकित्सावत् । अपि च ।
“चर्म्मकीलं जतुमणिं मसकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः ॥”
इति भावप्रकाशः ॥

चर्म्मकृत्, पुं, (चर्म्म करोति चर्म्मघटितपादुकादिकम् उत्पादयतीत्यर्थः । चर्म्म + कृ + क्विप् ।) चर्म्मकारः इति हलायुधः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५५ । [योगिनीम् ॥”)
“चर्म्मकृत् कोऽपि न प्रादात् कुटीं स्वेनोप-

चर्म्मचटका, स्त्री, (चर्म्मणा चटकेव ।) निशाचरपक्षिविशेषः । चामचिका इति भाषा ॥ तत्पर्य्यायः । जतुका २ अजिनपत्रिका ३ । इति हेमचन्द्रः ॥ जतूका ४ गृहमाचिका ५ जतुनी ६ अजिनपत्रा ७ चार्म्मिः ८ चर्म्मचटी ९ । इति शब्दरत्नावली ॥ चर्म्मपत्रा १० । इति जटाधरः ॥ चर्म्मचटिका ११ । इति केचित् ॥

चर्म्मचटी, स्त्री, (चर्म्मणा चटीव । यद्वा, चर्म्म चटति भिनत्तीति । चट + अच् ङीष् ।) चर्म्मचटका । इति शब्दरत्नावली ॥

चर्म्मचित्रकं, क्ली, (चर्म्मणि चित्रकं चित्रितमिवेत्यर्थः । चर्म्म चित्रयतीति वा । चित्र + ण्वुल् ।) श्वेतकुष्ठम् । इति राजनिर्घण्टः ॥

चर्म्मजं, क्ली, (चर्म्मणो चर्म्मणि वा जायते । जन + डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

चर्म्मण्वती, स्त्री, (चर्म्मैव उत्पत्तिहेतुत्वेनास्त्यस्याः इति मतुप् मस्य वत्वम् ।) नदीविशेषः । सा तु बुन्देलखण्डाख्यदेशे चम्बल इति ख्याता ॥ कदली । इति मेदिनी । ते, १६६ ॥ (आसीत् किल पुरा रन्तिदेवनामा (शशबिन्दुनामा वा) कश्चित् राजचक्रवर्त्ती । तस्य यज्ञे मारिता ये गावस्तेषां चर्म्मगलितरक्तोदादिभ्यो जातेयं नदीति पौराणिकी गाथा । यथा, देवीभागवते । ९ । १८ । ५४ ।
“चर्म्मणां पर्व्वतो जातो विन्ध्याचलसमः पुनः ।
मेघाम्बुप्लावनाज्जाता नदी चर्म्मण्वती शुभा ॥”)

चर्म्मदण्डः, पुं, (चर्म्मभिश्चर्म्मणा वा निर्म्मितो दण्डः ।) कशा । इति हेमचन्द्रः ॥ चाबुक् इति भाषा ॥
(“चर्म्मदण्डाहतो विप्रः शशापातिरुषा च तम् ॥”
इति महाभारतशान्तिपर्व्वणि ॥)

चर्म्मदूषिका, स्त्री, (चर्म्म दूषयति दोषयति वा । दुष + णिच् + ण्वुल् । ततष्टापि अत इत्वम् ।) कोठरोगः । इति राजनिर्घण्टः ॥

चर्म्मतरङ्गः, पुं, (चर्म्मणां चर्म्मभिर्वा तरङ्ग इव ।) वलिः । त्वक्सङ्कोचः । इति राजनिर्घण्टः ॥

चर्म्मद्रुमः, पुं, (चर्म्म त्वगिव वल्कलमस्य द्रुमः ।) भूर्जवृक्षः । इति राजनिर्घण्टः ॥

चर्म्मपत्रा, स्त्री, (चर्म्ममयं पत्रं पक्षद्वयं यस्याः ।) चर्म्मचटी । इति जटाधरः ॥

चर्म्मपादुका, स्त्री, (चर्म्मनिर्म्मिता चर्म्ममयी वा पादुका ।) उपानत् । चामड़ार जुता इति भाषा ॥ यथा । “ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुकायुगले पादौ निदध्यात् ।” इति भवदेवभट्टः ॥ अस्या गुणाः पादुकाशब्दे द्रष्टव्याः ॥

चर्म्मपुटः, } पुं, (चर्म्मनिर्म्मितः पुटः पात्रम् ।
चर्म्मपुटकः, } पक्षे स्वार्थे कन् । चर्म्ममयं पुटमत्र इति कप् इत्येके ।) चर्म्मनिर्म्मितपात्रविशेषः । कुपा इति भाषा ॥ यथा । इतिचर्म्म पुटकः । इतिचर्म्मपुटे मतुस्ये चेति मेदिनी ॥ इति पुंलिङ्गसंग्रहटीकायां भरतः ॥ तत्पर्य्यायः । दृतिः खल्लचर्म्ममयीति हेमचन्द्रः ॥

चर्म्मप्रभेदिका, स्त्री, (चर्म्म प्रभिनत्तीति । प्र + भिद + ण्वुल् । टापि अत इत्वञ्च ।) चर्म्मप्रभेदनास्त्रम् । इत्यमरः । २ । १० । ३५ ॥ पोड़ इति भाषा ॥

चर्म्मप्रसेवकः, पुं, (चर्म्मणा प्रसीव्यते इति । षिवु तन्तुसन्ताने + “संज्ञायाम् ।” ३ । ३ । १०९ । इति कर्म्मणि ण्वुल् बाहुलकात् वुन् वा ।) चर्म्मप्रसेविका । इत्यमरटीकायां भरतः ॥

चर्म्मप्रसेविका, स्त्री, (चर्म्मप्रसेवक + टाप् अत इत्वञ्च ।) अग्निसन्दीपनार्थं चर्म्म निर्म्मितयन्त्रम् । भाती इति जाँता इति च भाषा ॥ तत्पर्य्यायः । भस्त्रा २ । इत्यमरः । २ । १० । ३३ ॥

चर्म्ममुण्डा, स्त्री, (चर्म्मणः जीवरहितदेहस्येत्यर्थः मुण्डमस्तिहस्तेऽस्या इति । छिन्नशिरोधारणादेव तथात्वम् ।) दुर्गा । इति हेमचन्द्रः । २ । १२० ॥ (चण्डमुण्डा । इत्यपि क्वचित् पाठः ॥)

चर्म्मरङ्गा, स्त्री, (चर्म्मणि रङ्गो यस्याः ।) आवर्त्तकीलता । इति राजनिर्घण्टः ॥ (देशविशेषे, पुं । स च देशः कूर्म्मविभागे पश्चिमोत्तरस्यां दिशि उक्तः । यथा, बृहत्संहितायाम् । १४ । २३ ।
“दिशि पश्चिमोत्तरस्याम् ।” इत्युपक्रम्य,—
“वेणुमती फल्गुलुका
गुरुहा मरुकुच्चचर्म्मरङ्गाख्याः ॥”
इत्युक्तवान् ॥)

चर्म्मरुः, पुं, (चर्म्म रुचयतीति । रुच + बाहुलकात् डुः ।) चर्म्मकारः । इति त्रिकाण्डशेषः ॥

चर्म्मसम्भवा, स्त्री, (चर्म्मणि सम्भव उत्पत्तिर्यस्याः ।) एला । इति हारावली । ६७ ॥

चर्म्मसारः, पुं, (चर्म्मणः सारः । भुक्तद्रव्येभ्यो रसस्य त्वङ्मध्ये जायमानत्वात् तथात्वम् ।) रसः । इति राजनिर्घण्टः ॥

चर्म्माम्भः, पुं, (चर्म्मणोऽम्भः जलम् । सर्व्वं साम्ना अदन्तञ्च ।” इति न्यायादत्र अकारान्तः । क्वचित् क्लीवे सान्तोऽपि दृश्यते ।) रसः । इति राजनिर्घण्टः ॥

चर्म्मारः, पुं, (चर्म्म चर्म्मक्रियां ऋच्छतीति । ऋ गतौ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति जटाधरः ॥

चर्म्मी, [न्] पुं, (चर्म्म शरीरावरकं शस्त्रविशेषोऽस्त्यस्य । चर्म्म + इनिः ।) चर्म्मधारियोद्धा । ढाली इति भाषा ॥ तत्पर्य्यायः । फलकपाणिः २ । (यथा, महाभारते । ३ । २७ । ३१ ।
“श्यामं दृष्ट्वा तरुणं चर्म्मिणामुत्तमं रणे ।
नशूलं ते वने दृष्ट्वा कस्मात् मन्युर्न वर्द्धते ॥”
चर्म्म त्वक् अस्त्यस्येति ।) भूर्जवृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ११ अः । “चर्म्मिवृक्षगिरिकर्णिकाशोणिवनिपुलदाडिमाश्वकर्णहरिद्रादारुजादगोपत्रं रटविकङ्कतेषु वा यवान्नविकारांश्च सेवेत ॥) भङ्गपरीटः । मौरा । इति शब्दरत्नावली ।